

# पूजा पीठिका



ॐ जय जय जय, नमोऽस्तु नमोऽस्तु नमोऽस्तु।
णमो अरिहंताणं, णमो सिद्धाणं, णमो आइरियाणं,
णमो उवज्झायाणं, णमो लोए सव्वसाहूणं।

ॐ ह्रीं श्री अनादि मूलमंत्रेभ्यो नमः (पुष्पांजलि क्षिपेत्)

चत्तारि मंगलं, अरिहंता मंगलं, सिद्धा मंगलं,
साहू मंगलं, केवलिपण्णत्तो धम्मो मंगलं।
चत्तारि लोगुत्तमा, अरिहंता लोगुत्तमा, सिद्धा लोगुत्तमा,
साहू लोगुत्तमा, केवलिपण्णत्तो धम्मो लोगुत्तमा।
चत्तारि सरणं पव्वज्जामि, अरिहंते सरणं पव्वज्जामि,
सिद्धेसरणं पव्वज्जामि, साहू सरणं पव्वज्जामि।
केवलिपण्णत्तं धम्मं सरणं पव्वज्जामि।

ॐ नमोऽर्हते नमः (पुष्पांजलि क्षिपेत्)

अपवित्रः पवित्रो वा सुस्थितो दुःस्थितोऽपि वा।
ध्यायेत्पंच - नमस्कारं सर्वपापैः प्रमुच्यते॥१॥
अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा।
यः स्मरेत्परमात्मानं स बाह्याभ्यन्तरे शुचिः॥२॥
अपराजित - मन्त्रोऽयं सर्व-विघ्न-विनाशनः।
मंगलेषु च सर्वेषु प्रथमं मंगलं मतः॥३॥
एसो पंच - णमोयारो सव्व-पावप्पणाणो।
मंगलाणं च सव्वेसिं पढमं होइ मंगलं॥४॥
अर्हंमित्यक्षरं ब्रह्मवाचकं परमेष्ठिनः।
सिद्धचक्रस्य सद्बीजं सर्वतः प्रणमाम्यहं॥५॥
कर्माष्टक - विनिर्मुक्तं मोक्ष-लक्ष्मी - निकेतनं।
सम्यक्तवादि - गुणोपेतं सिद्धचक्रं नमाम्यहं॥६॥
विघ्नौघाः प्रलयं यान्ति शाकिनी-भूत-पन्नगाः।
विष निर्विषता याति स्तूयमाने जिनेश्वरे॥७॥ पुष्पांजलि क्षिपेत्।

# पंचकल्याणक अर्घ

उदक-चन्दन-तन्दुल-पुष्प-कैश्चरु-सुदीप-सुधूप फलार्घकैः।
धवल-मंगल-गान-रवाकुले जिनगृहे जिननाथमहं यजे॥

ॐ ह्रीं भगवान के गर्भ जन्म तप ज्ञान निर्वाण पंचकल्याणकेभ्यो
अर्घं निर्व. स्वाहा।

# पंचपरमेष्ठी का अर्घ

उदकचन्दनतन्दुल पुष्पकैश्चरुसुदीपसुधूप फलार्घकैः।
धवलमंगलगानरवाकुले जिनगृहे जिन इष्टमहं यजे॥

ॐ ह्रीं श्री अरहन्तसिद्धाचार्योपाध्याय सर्वसाधुभ्योऽर्घ्यं निर्वपामीति स्वाहा।

# सहस्रनाम का अर्घ

उदकचन्दनतन्दुल पुष्पकैश्चरुसु दीपसुधूप फलार्घकैः।
धवल मंगलगानरवाकुले जिनगृहे जिननाम अहं यजे॥

ॐ ह्रीं श्री भगवज्जिनसहस्रनामेभ्योऽर्घ्यं निर्वपामीति स्वाहा।

# भक्तामर अर्घ

भक्तामर-प्रणत-मौलि-मणि-प्रभाणा-मुद्योतकं दलित-पाप तमो-वितानम्।
सम्यक् प्रणम्य जिन-पाद युगं युगादा-वालम्बनं भव-जले पततां जनानाम् ॥१ ॥
स्तोत्र-स्रजं तव जिनेन्द्र गुणैर्निबद्धां, भक्त्या मया रूचिर-वर्ण-विचित्र-पुष्पां।
धत्ते जनो य इह कंठ-गतामजस्रं, तं मानतुंङ्गमवशा समुपैति लक्ष्मीः ॥४८ ॥

ॐ ह्रीं पठन पाठन श्रीतृश्रद्धावनत मानतुंगाचार्य समस्त जीवकल्याणकाय
श्रीआदि परमेश्वराय अर्घं निर्वपामीति स्वाहा।

# तत्वार्थसूत्रम् अर्घ

मोक्षमार्गस्य नेतारं भेत्तारं कर्मभूभृताम्।
ज्ञातारं विश्वतत्वानां वन्दे तद्गुणलब्धये॥
उदकचन्दनलतन्दुल पुष्पकैश्चरूसुदीपसुधूप फलार्घकैः।
धवल मंगलगानरवाकुले जिनगृहे जिनसूत्रमहं यजे॥

ॐ ह्रीं श्री उमास्वामी रचित तत्वार्थसूत्र अनर्घपद प्राप्तये अर्घम् निर्वपामीति स्वाहा।

# णमोकार अर्घ

उदक गंध आदि मिला अर्घ लाया।
महामंत्र नवकार को मैं चढ़ाया॥
णमोकार मंत्राक्षरों को जजूं मैं।
महाघोर संसार दुःख से बचूं मैं॥

ॐ ह्रीं अनादिनिधन पंच नमस्कार मंत्राय अनर्घ्यपदप्राप्तये अर्घ्यं निर्वपामीति स्वाहा॥

# स्वस्ति मंगल

श्रीमज्जिनेन्द्र मभिवन्द्य जगत्त्रयेशं,
स्याद्वाद-नायक-मनन्त-चतुष्टयार्हं।
श्रीमूलसंघ-सुदृशां सुकृतैकहेतु,
जैनेन्द्र-यज्ञ-विधिरेष मयाऽभ्यधायि॥१॥

स्वस्ति त्रिलोक-गुरवे जिन-पुंगवाय,
स्वस्ति स्वाभाव-महिमोदय-सुस्थिताय।
स्वस्ति प्रकाश-सहजोर्जित-दृङ्मयाय,
स्वस्ति प्रसन्न-ललिताद्भुत-वैभवाय॥२॥

स्वस्त्युच्छलद्विमल - बोधसुधा - प्लवाय,
स्वस्ति स्वाभाव - परभाव - विभासकाय।
स्वस्ति त्रिलोक - विततैक - चिदुद्गमाय,
स्वस्ति त्रिकाल-सकलायत-विस्तृताय॥३॥

द्रवस्य शुद्धिमधिगम्य यथानुरूपं,
भावस्य शुद्धि मधिकामधिगन्तुकामः।
आलम्बनानि विविधान्यवलम्ब्य वल्गन्,
भूतार्थ-यज्ञ-पुरुषस्य करोमि यज्ञं॥४॥

अर्हत्पुराण - पुरुषोत्तम - पावनानि,
वस्तून्यनूनमखिलान्ययमेक एव।
अस्मिन् ज्वलद्विमल - केवल - बोधवह्नौ,
पुण्यं समग्रहमेकमना जुहोमि ॥८॥

ॐ ह्रीं विधियज्ञ प्रतिज्ञानाय जिनप्रतिमाग्रे पुष्पांजलिं क्षिपेत्।

श्री वृषभो नः स्वस्ति, स्वस्ति श्री अजितः ।
श्रीसम्भवः स्वस्ति, स्वस्ति श्रीअभिनन्दनः।
श्रीसुमतिः स्वस्ति, स्वस्ति श्रीपद्मप्रभः।
श्रीसुपार्श्वः स्वस्ति, स्वस्ति श्रीचन्द्रप्रभः।
श्रीपुष्पदन्तः स्वस्ति, स्वस्ति श्रीशीतलः।
श्रीश्रेयांसः स्वस्ति, स्वस्ति श्रीवासुपूज्यः।
श्रीविमलः स्वस्ति, स्वस्ति श्रीअनन्तः।
श्रीधर्मः स्वस्ति, स्वस्ति श्रीशान्तिः।
श्रीकुन्थुः स्वस्ति, स्वस्ति श्रीअरनाथः।
श्रीमल्लिः स्वस्ति, स्वस्ति श्रीमुनिसुव्रतः।
श्रीनमिः स्वस्ति, स्वस्ति श्रीनेमिनाथः।
श्री पार्श्वः स्वस्ति, स्वस्ति श्रीवर्द्धमानः।

( पुष्पांजलि क्षेपण )

इति जिनेन्द्र स्वस्तिमंगलविधानम्।



नित्याप्रकंपाद्भुत-केवलौघाः स्फुरन्मनः पर्यय-शुद्धबोधाः।
दिव्यावधिज्ञान-बलप्रबोधाः स्वस्तिक्रियासुः परमर्षयो नः ॥ (पुष्पांजलि क्षेपण)

कोष्ठस्थ-धान्योपममेकबीजं संभिन्न-संश्रोतृ-पदानुसारि।
चतुर्विधं बुद्धिबलं दधानाः स्वस्ति-क्रियासुः परमर्षयो नः ॥ (पुष्पांजलि क्षेपण)

संस्पर्शनं संश्रवण च दूरादास्वादन-घ्राण-विलोकनानि।
दिव्यान मतिज्ञान बलाद्वहन्त स्वस्तिक्रियासु परमर्षयो नः ॥ (पुष्पांजलि क्षेपण)

प्रज्ञाप्रधानाः श्रमणाः समृद्धाः प्रत्येकबुद्धा दशसर्वपूर्वैः।
प्रवादिनोऽष्टांग-निमित्त-विज्ञाः स्वस्ति क्रियासुःपरमर्षयो नः ॥ (पुष्पांजलि क्षेपण)

जंघावलि-श्रेणि-फलांबु-तन्तु-प्रसून-बीजांकुर-चारणाह्वाः।
नभोऽङगण-स्वैर-विहारिणश्च स्वस्ति क्रियासुः परमषयो नः ॥ (पुष्पांजलि क्षेपण)

अणिम्नि दक्षाः कुशला महिम्नि लघिम्नि शक्ताःकृतिना गरिम्णि।
मनो-वपुर्वाग्वलिनश्च नित्यं, स्वस्ति क्रियासुः परमर्षयो नः ॥ (पुष्पांजलि क्षेपण)

सकामरुपित्व-शित्वमैश्यं प्राकाम्य मन्तर्द्धिमथाप्तिमाप्ताः।
तथाऽप्रतीघातगुणप्रधानाः स्वस्ति क्रियासुः परमर्षयो नः ॥ (पुष्पांजलि क्षेपण)

दीप्तं च तप्तं च तथा महोग्रं घोरं तपो घोरपराक्रमस्थाः।
ब्रह्मापरं घोर-गुणाश्चरन्तः स्वस्ति क्रियासुः परमर्षयो नः ॥ (पुष्पांजलि क्षेपण)

आमर्ष-सर्वौषधयस्तथाशीर्विषं विषा दृष्टि विषंविषाश्च।
सखिल्लविड्जल्ल-मलौषधीशाः स्वस्ति क्रियासु परर्षयो नः ॥ (पुष्पांजलि क्षेपण)

क्षीरंस्त्रवन्तोऽत्र घृतं स्त्रवन्तो मधु स्त्रवन्तोऽप्यमृत स्त्रवन्तः।
अक्षीणसंवास-महानसाश्च स्वस्ति क्रियासुः परमर्षयो नः ॥ (पुष्पांजलि क्षेपण)

इति स्वस्ति मंगल विधानम्